

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# श्रीपाञ्चरात्रागमे विष्वक्सेनसंहितायामुक्तभूपरीक्षाविधिः

Gandhe.Rajeshwari
Research Scholar
Department of Agama
NSU-Tirupati
Mob:8555048011
rajeshwarigandhe1@gmail.com

**आगमपरिचयः-**

अपारकरुणासिन्धुः भगवान् श्रीमन्नारायणः स्वतप्रमाणभूतमपौरुषेयं ग्रन्थराशिं चतुर्मुखायो उपदिदेशेति। श्वेताश्वतरोपनिषदि- **यो ब्रह्माणं विदधाति पूर्व यो वै वेदांश्च प्रहिणोति तस्मै[1] इत्युक्तम्।** अपौरुषेयः वेदः निगमशब्देनापि व्यवहियते। आगमो नाम **अनादिसम्प्रदायसिद्धगुरुशिष्यपरम्परोपदेशकमागतशास्त्रविशेषः[2]** इति लक्ष्मीतन्त्रे उपोद्घाते दरीदृश्यते। आङ् इत्युपसर्गपूर्वकात् गत्यर्थकात् **गमॢ-गतौ** धातोः **गृहवृद्दनिश्चिगमश्च[3]** इति पाणिनीये सूत्रेण अप् प्रत्यये आगमशब्दोऽयं निष्पन्नः। **गत्यर्थकाः बुध्यर्थकाः** इति महाभाष्यवचनानुसारं आगमशब्दस्य ज्ञानप्रबोधकत्वं सिध्यति। एवञ्चागमो नाम भगवतः आराधनासम्बन्धज्ञानप्रबोधक इति हि सिद्धः । आगमपरम्परायां बौद्धजैनार्हतशाक्तशैववैखानस -पाञ्चरात्रसौरवैनायकस्कान्दादिरूपेण प्रभेदास्सन्ति। एतेषु शाक्तशैववैष्णवादय एव वैदिकाः अपरे तु अवैदिकाः इत्यभिधीयन्ते। वैष्णवागमः विष्णुपारम्यप्रतिपादकः। वैष्णवागमः वैखानसपाञ्चरात्रभेदेन द्विधा विभक्तः। उभयमपि नितरां प्रमाणभूतमेव ।

---

[1] **श्वेताश्वतरोपनिषत्**

[2] **लक्ष्मीतन्त्रम् उपोद्घातः– पृ.सं.१**

[3] **अष्टाध्यायी –३ - ३–५८**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**पाञ्चरात्रशब्दार्थः -**

सर्वेष्वागमसम्प्रदायेषु श्रीमत्पाञ्चरात्रं सर्वोन्नतं स्थानमावहति। पाञ्चरात्रं साक्षात् भगवता श्रीमन्नारायणेन श्रीशेषपक्षीश्वरहिरण्यगर्भविष्वक्सेनेभ्यो ऐदम्प्रथमतया पञ्चप्रकारकैःउपदिष्टम्। पुरुषोत्तमसंहितायाम्-

**सार्धकोटिप्रमाणेन ब्रह्मणा केशवाच्छ्रुतम्।**
**रात्रिभिःपञ्चभिस्सर्वं पाञ्चरात्रागमं स्मृतम्**[4] **॥ इति ।**

एवञ्च पाञ्चरात्रागमस्य वक्ता श्रीमन्नारायणःएवेति निश्चप्रचं वक्तुं शक्यते।

**पाञ्चरात्रविकासः**

पाञ्चरात्रविकासःचतुर्था दशासु विद्यत इति P.P.Apte महोदयैरभिहितम्।

१. प्राचीनकालः २. आगमकालः ३. आचार्यकालः ४. आधुनिककाल इति।

१. **प्राचीनकालः**

शतपथब्राह्मणकालादारभ्य महाभारतकालपर्यन्तमिति ज्ञायते। कालोऽयं क्रीस्तोः प्राक् सहस्रवर्षात्मककाल इति चारित्रकानामभिप्रायः।

२. **आगमकालः**

महाभारतकालादारभ्य आगमवाङ्मयतया देवालयोत्पत्तिकालः आगमकालः इत्युच्यते। अयमपि क्रीस्तोःप्राक् सहस्त्रवर्षात्मककाल एव।

३. **आचार्यकालः**

पाञ्चरात्रसिद्धान्ते वैष्णवसम्प्रदाये पूर्वचार्याणामुत्तराचार्याणाञ्च साङ्घिकधार्मिकसम्प्रदायाःविराजमानःकालःप्रायशःक्रीस्तोःपश्चात् १०००A.D.– १९००A.D. मध्यकाल इति ज्ञायते ।

४. **आधुनिककालः**

प्राच्यपाश्चात्यविद्वांसः पाञ्चरात्रविषये कृताः शोधनादिकाः तत्सम्बन्धकालः। चतुर्थे आधुनिककाले सात्त्वतसंहिता, पौष्करसंहिता, जयाख्यसंहिता, ईश्वरसंहिता,

---

[4] **4.पुरुषोत्तमसंहित - अध्यायाः–१ - ८**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

पारमेश्वरसंहिता, पाद्मसंहितादयो अधिकतया प्रचारे न्यवर्तन्त। SriBhandarkar. V.Raghavan, V.Bhatta-charya, K.C.Varadacharya, M.Narasimhacharya, P.P.Apte, K.K.Ananta venkatacharya, R.S.Bhatta, Prof.S.B.Raghunathacharya इत्याद्याः भारतीयपरि-शोधकाः तथैव, F.O.Schrader,Van Buitien, H.D.Smith, John Gonda इत्यादयः पाश्चात्य - परिशोधकाश्च पाञ्चरात्रे बहुधा परिशोधनमकुर्वन्। तथैव अमेरिकादेशे Seiquerus विश्वविद्यालये H.D.Smithमहाभागाः चेन्नपुर्या पाञ्चरात्रपरिशोधनपरिषदुद्धारणमकरोत्। पाञ्चरात्रागमः अक्षयम्, असंख्याकमिति कीर्त्यते।

**पाञ्चरात्रभेदाः**

कुत्स्नं पाञ्चरात्रशास्त्रं दिव्यम्–मुनिभाषितम् मानुषमिति त्रिधा विभक्तमस्ति ।

१.**दिव्यम्**

यच्च साक्षान्नारायणेन उपदिष्टं तद्दिव्यमित्याचक्षते। सात्वतपौष्करजयाख्याः दिव्यमिति व्यवह्रियन्ते।

**सात्त्वतं पौष्करं चैव जयाख्यञ्च तथैव च।**
**एवमादीनि दिव्यानि शास्त्राणि हरिणा स्वयम् ॥**
**मूलवेदानुसारेण प्रोक्तानि हितकाम्यया ।**
**अतो रत्नत्रयमिति हेतोःप्रोच्यते तद्दिव्यम्** [5] **॥ इति।**

२.**मुनिभाषितम्**

नारायणेतराःऋषिभ्यःब्रह्मादयो उपदिष्टं यत्तत् मुनिभाषितमित्युच्यते ।

**वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयम्।**
**अनुष्टुब्छन्दोबद्धेन समासव्यासभेदतः ॥**
**तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम् ।**
**लोकेष्वपि च दिव्येषु तद्दिव्यं मुनिसत्तमाः ॥**

---

[5]**ईश्र्वरसंहित –१. ६४–६५**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**ब्रह्मरुद्रप्रमुखैर्देवैःऋषिभिश्च तपोधनैः ।**
**स्वयं प्रणीतं यच्छास्त्रं तदुज्ञेयं मुनिभाषितम्[6] ॥ इति ।**

अत्र ईश्वरपारमेश्वरभारद्वाजाद्याःमुनिभाषितमिति व्यवह्रियन्ते।

३. **मानुषम्**

ऋषिभ्योऽपि अन्यैः आप्तवचनैः यदुपदिष्टमिति सूच्यते तन्मानुषमितिचोच्यते। पाञ्चरात्रागमःसात्त्वतराजसतामसभेदेन त्रिधा। **एतत्तु त्रिविधं विद्धि सात्त्विकादिविभेदतः** इति ईश्वरसंहिता वचनानुसारं याश्च साक्षान्नारायणेन प्रकाशितातााः सात्त्विका इति, नारायणेनएकं भागं स्मृत्वा ब्रह्मरुद्रादिभिःतथैव तेषां योगमहिम्नारचितं शास्त्रं राजसमिति, स्वकपोलकल्पित ज्ञानेन तमोगुणप्रचुरत्वात् विरचितं तामसमित्युच्यते।

**पाञ्चरात्रशब्दार्थः**

सर्वेष्वागमसम्प्रदायेषु श्रीमत्पाञ्चरात्रं सर्वोन्नतं स्थानमावहति। पाञ्चरात्रं साक्षात् भगवता श्रीमन्नारायणेन श्रीशेषपक्षीश्वरहिरण्यगर्भविष्वक्सेनेभ्यो ऐदम्प्रथमतया पञ्चप्रकारकैःउपदिष्टम्। पुरुषोत्तमसंहितायाम्-

**सार्धकोटिप्रमाणेन ब्रह्मणा केशवाच्छ्रुतम्।**
**रात्रिभिःपञ्चभिस्सर्वं पाञ्चरात्रागमं स्मृतम्[7] ॥ इति ।**

एवञ्च पाञ्चरात्रागमस्य वक्ता श्रीमन्नारायणःएवेति निश्चप्रचं वक्तुं शक्यते।

**पाञ्चरात्रविकासः**

पाञ्चरात्रविकासःचतुर्धा दशासु विद्यत इति P.P.Apte महोदयैरभिहितम्।

१. प्राचीनकालः २. आगमकालः ३. आचार्यकालः ४. आधुनिककाल इति।

१. **प्राचीनकालः**

शतपथब्राह्मणकालादारभ्य महाभारतकालपर्यन्तमिति ज्ञायते। कालोऽयं क्रीस्तोः प्राक् सहस्रवर्षात्मककाल इति चारित्रकानामभिप्रायः ।

---

[6]**ईश्वरसंहित –१. ७७ - ७९**

[7]**4.पुरुषोत्तमसंहित - अध्यायाः–१ - ८**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

Cover Page

२. **आगमकालः**

महाभारतकालादारभ्य आगमवाङ्यतया देवालयोत्पत्तिकालः आगमकालः इत्युच्यते। अयमपि क्रीस्तोःप्राक् सहस्त्रवर्षात्मककाल एव।

३. **आचार्यकालः**

पाञ्चरात्रसिद्धान्ते वैष्णवसम्प्रदाये पूर्वचार्याणामुत्तराचार्याणाञ्च साङ्घिकधार्मिक - सम्प्रदायाः विराजमानः कालः प्रायशः क्रीस्तोः पश्चात् १०००A.D.– १९००A.D. मध्यकाल इति ज्ञायते ।

४. **आधुनिककालः**

प्राच्यपाश्चात्यविद्वांसः पाञ्चरात्रविषये कृताः शोधनादिकाः तत्सम्बन्धकालः। चतुर्थे आधुनिककाले सात्त्वतसंहिता, पौष्करसंहिता, जयाख्यसंहिता, ईश्वरसंहिता, पारमेश्वरसंहिता, पाद्मसंहितादयो अधिकतया प्रचारे न्यवर्तन्त। SriBhandarkar. V.Raghavan, V.Bhattacharya, K.C.Varadacharya, M.Narasimhacharya, P.P.Apte, K.K.Ananta venkatacharya, R.S.Bhatta, Prof.S.B.Raghunatha charya इत्याद्याः भारतीयपरिशोधकाः तथैव, F.O.Schrader,Van Buitien, H.D.Smith, John Gonda इत्यादयः पाश्चात्यपरिशोधकाश्च पाञ्चरात्रे बहुधा परिशोधन मकुर्वन्। तथैव अमेरिकादेशे Seiquerus विश्वविद्यालये H.D.Smithमहाभागाः चेन्नपुर्या पाञ्चरात्रपरिशोधनपरिषदुद्धारणमकरोत्। पाञ्चरात्रागमः अक्षयम्, असंख्याकमि -ति कीर्त्यते।

**पाञ्चरात्रभेदाः**

कृत्स्नं पाञ्चरात्रशास्त्रं दिव्यम्–मुनिभाषितम् मानुषमिति त्रिधा विभक्तमस्ति ।

१.**दिव्यम्**

यच्च साक्षान्नारायणेन उपदिष्टं तद्दिव्यमित्याचक्षते। सात्वतपौष्करजयाख्याः दिव्यमिति व्यवह्रियन्ते।

**सात्त्वतं पौष्करं चैव जयाख्यञ्च तथैव च।**
**एवमादीनि दिव्यानि शास्त्राणि हरिणा स्वयम् ॥**

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**मूलवेदानुसारेण प्रोक्तानि हितकाम्यया ।**
**अतो रत्नत्रयमिति हेतोःप्रोच्यते तद्दिव्यम्**[8] **॥ इति।**

## २.मुनिभाषितम्

नारायणेतराःऋषिभ्यःब्रह्मादयो उपदिष्टं यत्तत् मुनिभाषितमित्युच्यते ।

**वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयम्।**
**अनुष्टुब्छन्दोबद्धेन समासव्याासभेदतः॥**
**तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम् ।**
**लोकेष्वपि च दिव्येषु तद्दिव्यं मुनिसत्तमाः॥**
**ब्रह्मरुद्रप्रमुखैर्देवैःऋषिभिश्च तपोधनैः।**
**स्वयं प्रणीतं यच्छास्त्रं तदुज्ञेयं मुनिभाषितम्**[9] **॥ इति ।**

अत्र ईश्वरपारमेश्वरभारद्वाजाद्याःमुनिभाषितमिति व्यवह्रियन्ते।

## ३. मानुषम्

ऋषिभ्योऽपि अन्यैः आप्तवचनैः यदुपदिष्टमिति सूच्यते तन्मानुषमितिचोच्यते। पाञ्चरात्रागमः सात्त्वतराजसतामसभेदेन त्रिधा। **एतत्तु त्रिविधं विद्धि सात्त्विकादिविभेदतः** इति ईश्वरसंहिता वचनानुसारं याश्च साक्षान्नारायणेन प्रकाशितातः सात्त्विका इति, नारायणेनएकं भागं स्मृत्वा ब्रह्मरुद्रादिभिःतथैव तेषां योगमहिम्नारचितं शास्त्रं राजसमिति, स्वकपोलकल्पित ज्ञानेन तमोगुणप्रचुरत्वात् विरचितं तामसमित्युच्यते।

## पाञ्चरात्रे पादविभागः

पाञ्चरात्रमहच्छास्त्रं ज्ञानयोगक्रियाचर्यापादरूपेण विभक्तमिति अभिप्रयन्ति पाञ्चात्रानुयायिनः। **यथा -**

**तत्प्रवक्ष्यामि विप्रर्षे तन्त्रं वै लोकविश्रुतम्।**
**ज्ञानयोगक्रियाचर्या चतुष्पादसमन्वितम् ॥**

---

[8]**ईश्वरसंहित –१. ६४–६५**
[9]**ईश्वरसंहित –१. ७७ - ७९**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**रहस्यमद्भुतं दिव्यं यन्मया कपिलात् श्रुतम्।**
**संक्षिप्तं च महार्थं च सर्वसिद्धिप्रधानकम् ॥**
**सार्धकोटिप्रमाणेन ब्रह्मणा केशवात् श्रुतम् ।**
**तस्मात् समुद्धृतं तन्त्रं वारिधेरमृतं यथा [10] ॥ इति**

पाद्मसंहितायां ज्ञानपादे द्वितीयोऽध्यायस्य वाक्यमेवपरमं प्रमाणम्। एवं विहगेन्द्रसंहितायाम् -

**ज्ञानयोगक्रियाचर्याग्रन्थं शतसहस्रकम्।**
**पञ्चलक्षप्रमाणं स्यात् पाञ्चरात्रमि ति स्मृतम्**[11] ॥ इत्युक्तम्।

एतेषां प्रमाणानां भिन्नत्वमपि दृश्यते। यथा विष्णुतत्त्वसंहितायां ज्ञानयोगक्रियाचर्यादीनां स्थाने प्रथमद्वितीयतृतीयचतुर्थपदैः पादाः परिगण्यन्ते। एवं सनत्कुमारसंहितायां ऋषिरात्रबृहस्पतिरात्र- ब्रह्मरात्रशिवरात्र-इन्द्ररात्रञ्श्चेति पाञ्चरात्राणि ज्ञानादिपादानां स्थाने दृश्यन्ते ।

१.**ज्ञानपादः**

पाञ्चरात्रशास्त्रावतार; पाञ्चरात्रशब्दार्थ; सिद्धान्तभेदनिरूपणम्, विज्ञानशब्दार्थ; चतुर्मुख सृष्टि; संसार; बन्धमोक्षादय; विषयविवरणम्, सृष्ट्यादिब्रह्मलक्षणम्, ब्रह्मप्राप्तिः संहारहेतु -निरूपणम्,सत्त्वरजस्तमादिगुणत्रयनिरूपणम्, आहारत्रैविध्यम्, गतित्रैविध्यम्, आध्यात्मिकाधि भौतिकाधिदैविकादितापत्रयनिरूपणम्, चतुर्मुखस्यायुः परिमाण; सायुज्यसारूप्यसालोक्य- सामीप्यसाकारदिमुक्तिः पृथिव्यादिपञ्चविंशतितत्त्वानां निरूपणम् भुवनकोशस्वरूपनिरूपणम्, भारतवर्षविवरणम्, अतलादिलोकानां स्वरूपनिरूपणम्, भूरादि ऊर्ध्वलोकानां स्वरूपम् वैकुण्ठलोकवर्णनमित्याद्याः विषयाः ज्ञानपादे प्रतिपादिताः।

२. **योगपादः**

---

[10]**पाद्मसंहिता .ज्ञानपादम् - २.२ - ४**
[11]**विहगेन्द्रसंहिता –१.३६**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

योगपादे पञ्चाध्यायस्सन्ति। तेषु योगद्वैविध्यम् योगाङ्गनिरूपणम्, नाडीशुद्धिः प्राणायाम विधिः प्राणायामफलम्, वायुजयारिष्टनिरूपणम्, प्रत्याहारस्वरूपविवरणम्, अष्टादशमर्मस्थान -निरूपणम्, धारणालक्षणम्, पञ्चभूतस्थानविभाग; ध्यानलक्षणम्, जाग्रदादिवृत्तिस्थानानि, समाधिनिरूपणञ्चेति अंशाःप्रतिपादिताः।

३. **क्रियापादः**

क्रियापादे त्रयस्त्रिंशदद्ध्यायास्सन्ति। तेषु असिद्धायतनस्वरूपम्, आचार्यलक्षणम्, भूपरीक्षा, वास्तुपुरुषकल्पनम्, ग्रामलक्षणम्, कर्षणम्, निमित्तपरीक्षा, बालालयनिर्माणम्, द्वितलादि –निरूपणम्, प्रथमेष्टकाविधि गर्भन्यासः अधिष्ठानविधिः विमानानि, मूर्धेष्टकाविधिः विमान-देवता; वर्णलेपविधिः; लेपनत्रैविध्यम्, अर्थमण्टपगोपुरादिनिर्माणविधिः, दीर्घिकाविधिः, मठोद्यानादिनिर्माणपद्धतयः, शिलादा -रुमृदादिसंग्रहणविधिर्गर्भदोषपरीक्षामूर्तिनिमाणवैविध्यम्, ध्वजाद्यायुधानिस्थूपिका कीलस्थापनम्,स्थानकासीनशयनादिमूर्तिभेदकथनम्, मत्यादीनां मूर्तिनिर्माणविधिः लोहजप्रतिमानिर्माणविधिः , कर्माद्यर्चामूर्तिमानम्, बिम्बलक्षणम् परिवारविधिः अङ्कुरार्पणम्, कुण्डकल्पनम्, जलाधिवास; शयनाधिवास; प्रतिष्ठाविधि; मूर्तिप्रतिष्ठा, पाणिग्रहणविधिः, प्रभादिप्रतिष्ठाविधिः, गृहार्चादि मुख्यांशाःप्रतिपादिताः।

४. **चर्यापादः**

अस्मिन् पादे त्रयस्त्रिंशदध्यायाः विद्यन्ते। क्रमशः चक्राब्लमण्डलदीक्षा, नित्ययागविधिः , अग्निकार्य; पुरुषसूक्ताराधनम्, महाभिषेकः , सहस्रकलशाभिषेकः , ध्वजारोहणम् महोत्सवः , योग्यपुष्पाणि, पञ्चकालाः , पवित्रोत्सव; वाराहादिव्रतम्, देवालयसम्मार्जनम्, देवस्वापहारदोषः , जीर्णोद्धारः , नित्याराधनप्रायश्चित्तविधिः , उत्सवप्रायश्चित्तम्, सिद्धान्तभेदाः , मुद्राविधिः , मन्त्रोद्धारविषयाः प्रतिपादिताः। पाचरात्रसंहिताः ज्ञानादिभेदेन विभक्ताः। ज्ञानयोगपादाभ्यां क्रियाच्चर्यापादौ शास्त्रान्तरज्ञातविषयप्रतिपादकत्वादत्यन्तप्रामुख्याः।

**ज्ञानं योगश्च यदिदं केवलं मुक्तिकारम्।**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

स्थापयित्वा तु मां स्थाने पुरुषःस्वर्गमश्नुते ॥
यो मां संस्थाप्य सदने समाराधयति स्वयम्।
न तस्य केवलासिद्धिःस्थानाभ्यर्णजुषामपि ॥
तस्मात्सर्वात्मना ब्रह्मन् स्थाने मां स्थापयेत्पुमान्।
अत एव ज्ञानादपि क्रियार्ण्यमुत्तमम्[12] ॥ इति
पाद्मसंहितावचनमेवात्र प्रमाणं भवति।

## विष्वक्सेनसंहिता

पाञ्चरात्रसंहितासु विष्वक्सेनसंहिता अन्यतमा वरीवर्ति। अस्याः संहितायाः प्रतयः MGO MLR 3702, MOL सूच्यां II द्वितीयसम्पुटे 38, श्रीरङ्गंम शिङ्गमय्यङ्गार ग्रन्थालयः 481 श्रीवैकुण्ठं श्रीपेरियतिरुवडि अय्यङ्गार इत्यादि स्थलेषु सम्पूर्णतया 26-30, 39 अध्ययाः तथा प्रायश्चित्तसंग्रहादि ग्रन्थेष्वपि उपलभ्यन्ते। अत एव अस्याः संहितायाः समीचीनप्रकाशनमनेकप्रतीनां तुलनात्मकेनाध्ययनेन क्रियत इति विश्वासेन प्रकाश्यते।

विष्वक्सेनसंहितायाः प्रामाण्यावसरे आधारभूताः इमाः संहिताः परिगण्यन्ते। यथा कपिञ्जलसंहितानुसरं 53त्रिपञ्चाशत्तमा इति(53/100),पाद्मसंहितानुसारं पञ्चाशत्तमा (50/108), पुरुषोत्तमसंहितानुसारं षड्विंशत्तमा(26/106), भरद्वाजसंहातानुसारं चतुः पञ्चाशत्तमा(54/101), मार्कण्डयसंहितानुसारं पञ्चविशत्तमा(25/91), विश्वामित्रसंहि तानुसरं अष्टाविंशति(28/108), विष्णुतन्त्रसंहितानुसारं एकोनसप्ततितमा (69/154) इति। संहितेयं तत्त्वत्रयव्याख्याने

---

[12]पाद्मसंहिता ज्ञानपादम् –९ . ११ - १३

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

श्रीमद्वरवरमुनीन्द्रेण श्रीवेदान्तदेशिकेन श्रीमद्रामानुजाचार्यैरपि दृष्टान्तत्वेन स्वीकृता। अस्याः संहितायाः प्राचीनत्वं विशेषत्त्वमपि ऊहितुं शक्यते।

अनेकेषु पाञ्चरात्रसंग्रहादिषु संहितायाः स्वीकृतिः इत्यस्मात्प्रसि - द्धरूपा प्रतिभासते। अस्याः संहितायाः प्रथमे चत्वारि अध्यायान्ते पञ्चदशाध्यायान्ते पूर्वभागः इति प्रोक्तत्वादपि अनेकेषु अध्यायेषूत्तरभाग इति सूचनया विभागद्वयेन स्यादित्यूह्यते। एकस्मिन् विभागे विष्वक्सेनस्य शचीपतेः, विभागान्तरे विष्वक्सेन नारदयोर्मध्ये सम्भावितसंवादरूपेण संहितेयं विद्यमाना द्योत्यते। अस्यां संहितायां ज्ञानभागबोधकभागाः नोपलभ्यन्ते। दीक्षायाः अपि भागाः नाति वस्तुततया वर्ण्यन्ते। 25, 26अध्यायेषु (बालिका)पालिका, ध्वजोत्थापनमित्यादि सविस्तरविवरणं विशेषतया प्रदर्श्यते। अस्याः संहितायाः पूर्वोत्तरभागौ सम्मिश्र्याध्ययनेन तथानुसन्धानेन च पाञ्चरात्रशास्त्रजिज्ञासूनामत्यन्तमु -पकृति र्भवेदिति विदुषैरभ्यदायि।

## भूपरीक्षविधिः

श्रीपाञ्चरात्रागमे विष्वक्सेनसंहितायां प्रथमाध्याये एकोनषष्ठी श्लोकेषु भूपरीक्षविधिः निरूपिताः। अदौ विष्वक्सेनः भगवतः सकाशात् प्रासाद निर्माणविषये मूलांशान् ज्ञात्वा शचीपतये उपदिदेश। प्रासादनिर्माणयोग्यभूमेः चयनं कूर्यात्।अस्थिकेशादिरहिता कपाला ङ्गारवर्जिताभूमिः कर्षणार्थं योग्यभूता उच्यते। यस्यां भूमौ सरीसृपाद्याः व्याघ्राद्याः ये चान्ये दुष्टजन्तवः श्वाश्रृगालादिभिः संचरिता भूमिः निर्माणे उपयुज्यते चेत्तदा यजमानस्य बन्धुनाशः भवति। तथैव तुषभस्मास्थिकेशैश्च पुरीषमुत्रादियुता, तथैव क्रिमकिटपतङ्ग शर्कराद्यैः

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

समन्विता भूमिः यजमानस्य दुःख नाशिनी। तेन हेतुना भूमिं यत्नतः परीक्षयेत्। तदुक्तम्-

**यस्यां भूमौ प्रदृश्यन्ते तां भूमिं वर्जयेत् सदा।**

**आरम्भे श्वशृगालैश्च संकीर्णा बन्धुनाशिनी।।**

**पुरीषभूमिःसर्वेषां कर्तृर्दुःखप्रदा सदा।**

**तुषभस्मास्थिकेशैश्च काष्टलोष्टकपालकैः।।**

**क्रिमिकीटपतङ्गश्च शर्करैश्च समन्विता।**

**अशुभा श्रीकरी भूमिः तस्माद्यत्नात् परीक्षयेत्।।**[13] **इति**

एवं दुर्लभलक्षणैर्युक्तं भूमिं चित्वा पुनः यजमानः ब्राह्मणादिवर्णयुक्तः क्रमशः सिता-रक्ता-पीता-कृष्णा भेदेन च संग्रहणं कूर्यात्। तथैव घृत-रक्त-मूत्रविष्टोति गन्धयुता, मधुरा-कषाया-तिक्ता-कटु काऽदिरसयुक्ता च भूमिः अधमा परिगणिता। एवं भुवं वर्णगन्धरसादि भेदेन परीक्ष्य कर्षणविधिं समारभेत्। कर्षणविधौ अरत्निमात्रमानेन पांसुमुद्धृत्य पुनः पूरयेत्। पूरणावसरे पांसुरधिकः चेत् उत्तम समानं चेन्मध्यमा नूनं अधमा चेति फलकथनमुक्तम्। तदनु बीजानि वापयेयुः। त्रिरात्राभ्यन्तरे प्ररोहेण उत्तमा, पञ्चरात्रेण मध्यमा, सप्तरात्रिका अधमा चेति फलकथनं प्रोक्तम्। सस्यानां फलसमये गवां ग्रासादिभिः तोषयेत्। साधकः तदनु इन्द्रादि लोकपालान् सकलोपचारैः प्रपूज्य अन्नापूपलाजैः सर्वेभ्यः पृथक् मध्यरात्रे बलिं प्रदापयेत्।ततः प्रातः यजमानः देशिकपरिवारेभ्यः सह खातक्षेत्रं समेत्य समन्ततः। चतुरश्रं पुरुषद्वयंमानं तदर्धं पुनः तदर्धं पुनः तदर्धं क्षितिं खनित्वा तन्मध्ये जलमापूरयेत्। तत्र ब्रह्मबीजमन्त्रेण ब्राह्मणं

[13] विष्व.सं (1.3-6)

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

गन्धपुष्पाद्यैर्लङ्कृत्वा घण्टावाद्यशंङ्खा-दियुक्तं वीणावेणुसमन्वितं षोडशोपचारैः पूजयेत्। सुन्दरं मण्डपं कल्पयित्वा वस्त्रादीना -मधिवासनं कूर्यात्। तदनु सुसुन्दरं अष्टदलपद्मं विलिख्य तस्मिन् द्रोणाष्टकशालीनास्तीर्य पुनः गन्धतोयेनापूर्य गन्धपुष्पाक्षतैः समलंकृत्य तस्यां कर्णिकायां कुण्डमुपस्थपयेत्।तत्र नवरत्नानि संस्थाप्य देशिकोत्तमः भगवन्तं हिरण्यं सर्वभूतहृदिस्थितं सर्वविधात्मनाम -न्तरात्मानं परमात्मानं अणीयांसं नारायणमनामयं वासुदेवमन्त्रेण ध्यात्वा अधिवासयेत्। परितः विघ्नेशादीनां परिवारदेवानां पूर्वोक्तद्रव्यसंयुक्तान् समर्चयेयुः। ततः परं होमकर्म समारभेत्। कुम्भस्य पूर्वदिग्भागे चतुरश्रकुण्डं वृत्तं वा प्रकल्प्य तस्य पार्श्वे तण्डुलगोधुमैः स्थण्डिलं कारयेत्। देशिकः पालाशं गृहित्वा शङ्खतूर्यादिघोषैः स्वस्तिसूक्तमन्त्रैः सर्वविधब्राह्मणैः सर्वविघ्नोपशमनं पुण्याहं कर्म कारयेत्। तदनु अष्टोत्तरसहस्त्रं, अष्टोत्तरशतं वा नारसिंहमन्त्रेण जुहुयात्। अष्टाविंशतिसंख्यया औदुम्बरसमिद्भिः मूलमन्त्रेण हुत्वा चरुणा पुरुषसूक्तेण होममाचरेत्। अन्ते सर्वसंपत्करावहं पूर्णाहुतिं विधाय देशिकः द्वादशाक्षरसंज्ञया कुडुबं तदर्धं वा संगृह्य जुहूयात्। एवमन्ते यजमानः देशिकं यथा शक्ति वस्त्रदक्षिणताम्बूलादिभिः संपूजयेत्।

ततः प्रभाते आचार्यः अनुष्ठानादीन् समाप्य होममण्डपं प्रविश्य स्वैः स्वैः मन्त्रैः कुम्भान् प्रोक्ष्य प्रपूजयेत्। प्रासादस्य सीमायां सर्वदिक्षु भूतक्रूरबलिंदत्वा अष्टदिग्बन्धनं अस्त्रमन्त्रेण कूर्यात्। वेदपारगैः वैष्णवैः कुम्भोदकाशेषं क्षितिमध्ये समानीय अवटं क्रमशः पूर्य मृद्भिः सिकतसंयुतं सूत्रशङ्कून् संस्थापयेयुः।कर्षणविधिनिर्वहणे योग्यः कालः चैत्रमासे शुभदिने भवेत्। कुशलेन शिल्पिन सूत्रास्फालन दिश प्रासादं कारयेत्। साधकः कर्मयोग्यं स्थपतिं समाहूय प्रासादनिर्माणं कूर्यात्। अनेन

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

विधानेन यजमानः सर्व पाप विनिर्मुक्तः पुण्यकर्मभाक् तथा परमां गतिमाप्नुयात्। तेन सर्वेषां पुण्यं, आयुः, अरोग्यवर्धनं, राष्ट्रवृद्धि- करं धनधन्ययुतं राजराष्ट्रभि वृधिश्च भविष्यति।अन्ते देशिकं दक्षिणाताम्बूलादिना यजमानः तोषयेत्।एवं प्रासादनिर्माणे भागं गृह्णावतं शिल्पिनं स्थपतिं दैवज्ञं कनककुण्डवस्त्रादिभिः प्रपूज्य पश्चात् मुखवासनपूर्वकं संतुष्टभोजनेन च सदस्याने सर्वान् जनान् संतोषयेत्। ततः प्रभाते यजमानः देशिकेन सह कुशलेन शिल्पिना स्थपत्या प्रासाद - स्यैशान्ये बालालयं प्रकल्पयेत्। बालालयात्परं मूलालयं प्रकल्पयेत्। तस्मिन् कर्मणि मुख्यतया मूलालयस्थाने ब्रह्मस्थाने वा हस्तमात्रं गर्तं खनित्वा रत्नादीन् विन्यस्य सहस्रं शतनिष्कं तस्यार्धं तस्यार्धं च वा तप्तकान्चनमरकतादीन् साधकः विन्यसयेत्। ब्रह्मादीशा-नान्तं तत्तद्देवान् स्वस्वमन्त्रैः प्रपूज्य शङ्खादिघोषसंयुतं गर्भधानं समाचरेत्। ताम्रेण फेलाकां कृत्वा आवटं आच्छाद्य तं भित्तिं शिलया इष्टिकया समाच्छादयेत्। तदनु गन्धपुष्पादिभिः अभ्यर्च्य पूर्वोक्त क्रमेणैव देवीबिम्बं समर्च्य श्रियार्थं ब्रह्मबीजेन तथा देव्यादिमन्त्रश्च साधकः सर्वमपि कर्म संसाधयेत्।

**भूपरीक्षाविधिः**

आचार्यः यजमानेन सह गत्वा देवालयनिर्माणार्थं योग्यस्थलं परीक्ष्य स्वीकुर्यात्। भूपरीक्षाविषये शास्त्रमेवं विशदयति। भूमिः सुपद्मा-भद्रका-पूर्णा-धूम्रा इति चतुर्था। चतुर्था धूम्राभूमिः आलयनिर्माणे अयोग्या भवतीति हेतोः सा त्याज्या। अत उच्यते-

**सुपद्माभद्रका पूर्णा धूम्राश्चेति चतुर्विधा।**

**आद्यास्तिस्त्रः परिग्राह्या अन्त्या त्याज्या द्विजोत्तमाः।।**

**सुपद्मा**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

या भूमिः कुशदर्भादिग्रासससमाकीर्णा नित्यं तोयेन विराजमाना तृणार्थं हरिणाः गावश्च यत्र सञ्चरन्ति सा सुपद्मा इति कथिता। यथोक्तम्-

**कुशदर्भसमाकीर्णा नित्यं तोयेन संयुता।**

**हरिणाः यत्र सञ्चरन्ति सा सुपद्मेति कथ्यते।।**

**भद्रका** **फलिनो याज्ञिकाः वृक्षाः लतागुल्मसमन्विताः।**

**दृश्यन्ते भद्रका सा च पूर्णेति परिकीर्त्यते।।**

भूमौ फलवन्तो वृक्षाः, यज्ञार्थमुपयुज्यमानाः लतागुल्माश्च वर्धन्तेचेत् भद्रका परिकीर्तिता।

**पूर्णा** **फलिनो याज्ञिकाः वृक्षाः गिरिशिखरसमाश्रिताः।**

**दृश्यन्ते सा च पूर्णेति भूमिस्तु परिकीर्त्यते।।**"

या भूमिः गिरिशिखरसमाश्रिता, अधोजलसमायुक्ता भवति सा पूर्णा।

**धूम्रा**

यत्र काकाः श्येनाः, गृध्राः, शृगालाश्च सञ्चरन्ति, ऊसरक्षेत्ररूपा सा धूम्रा इति कथ्यते। इयं भूमिः सर्वथा त्याज्या। अतोच्यते-

**अधोजलसमायुक्ता गिरेश्शिखरसमाश्रिता।**

**वायसश्येनगृध्राढ्याः कठिना वृकसङ्कुला।।**

**ऊसरक्षेत्रसंयुक्ता सा धूम्रेति परिकीर्तिता।**

**धूम्रां च वर्जयेत् भूमिं भद्रकादिषु कारयेत्।।** इति।

एवमन्तिमां विहाय भद्रकादि त्रिषु भूमिषु मन्दिरनिर्माणार्थं परीक्ष्य तासु सुलक्षणां सुपद्मां भूमिमाचार्योक्तमार्गेण यजमानः वृणुयात्। तदनन्तरं भूपरीक्षा कर्तव्या। आदौ भूमेः जानुमात्रं गर्तं कारयेत्। इत्थं खात्वा प्राप्तां

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

मृदं पुनः तस्मिन्नेव गर्ते पूरयेत्। तदा गर्तपूरणानन्तरमपि यदि मृदवशिष्टं भवति सा उत्तमा, गर्तसमं भवति सा मध्यमा, गर्तादपि न्यूनं भवति अधमा चेति कथ्यते। भगवन्मन्दिरस्य बिम्बस्य निर्माणार्थञ्चादौ भूमेः परीक्षा कर्तव्या। एतादृशं भूपरीक्षालक्षणमुद्दिश्य बह्वीषु पाञ्चरात्रसंहितासु विशेषतया प्रस्तावितम्।अगस्त्यंसहितायां प्रथमेऽध्याये13-22श्लोकैः, अनिरुद्धसंहितायां प्रथमेऽध्याये14-22श्लोकै ईश्वरसंहितायां षोडशोऽध्याये 83-89श्लोकैः भूपरीक्षालक्षणं निरूपितम्। कपिञ्जले अष्टमेऽध्याये भूमेः चातुर्विध्यं प्रोक्तम्। यथा-

**अथ वक्ष्ये विशेषेण वसुधासंग्रहणं श्रुतम्।**
**उत्तमां भूमिमापाद्य गृण्हीयात् मूर्तिविद्याया।।**
**प्रासादानि विप्रेन्द्र प्राकाराणि सद्ग्रहे।**
**अष्टदिक्षु यथान्यायं शङ्कूनश्वत्थवृक्षजान्।।**
**चतुर्दिक्षु द्विजश्रेष्ठ! सूत्रपातं तु कारयेत्।**
**अष्टाक्षरेण मन्त्रेण शङ्कून् स्थाप्य यथाक्रमम्।।**
**प्राङ्मुखोदङ्मुखो वापि प्रसादोऽद्भिर्निषिच्य च।।**[14]" इति।

एवं-
**वृक्षमूलं समाश्रित्य समीकुर्यात्समन्ततः।**
**परिवासितगोभिश्च मासमेकं द्विजोत्तम।।**
**अर्धमासं तु विप्राणां पादेनाधिष्ठयेत्सदा।**
**सम्मार्जनं तथा लेपं प्रोक्षणं चाक्षतार्पणम्।।**
**सशलाकैस्ततो दर्भैः मार्जनं तु समारभेत्।**
**गन्धतोयेन चाभ्युक्ष्य विकिरेदक्षतान् बहून्।।**
**इत्येवं कारयेद्विद्वान् ततः कर्षणमाचरेत्।**

[14]कपिं. 8.2-6

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**वृषौ तु कपिलौ ग्राह्यौ समौ सम्पन्नलक्षणम्।।**[15] इति।

पाद्मे क्रियापादे प्रथमेऽध्याये भूपरीक्षा व्याख्याता। पौष्करे तृतीयेऽध्याये षष्ठिश्लोकैः मण्टपे कुण्डनिर्माणार्थं तथा मण्डलरनार्थञ्च भुवं परीक्षयेत्। द्विचत्वारिंशेऽध्याये देवालयनिर्माणा वसरे भुवं परीक्ष्येत। मार्कण्डेये द्वितीयेऽध्यान्तं भूमेः लक्षणपरीक्षा चकार। विष्णुसंहितायां द्वादशे-ध्याये भूभेदकथनमुक्त्वा पद्मवर्णः गन्धश्च न्यरूपि। यथोक्तम्-

**विप्रादीनां स्मृता भूमिः सर्वेषां चोत्तमस्य च।**
**सिता रक्ता च पीता च कृष्णा विप्रादिभूस्तथा।।**
**मधुरा च कषाया च तिक्ता च कटुका क्रमात्।**
**घृसृक्करुविङ्गन्धा बहुवर्णा तु वर्जिता।।**
**धान्यपूर्णामकुम्भस्थवर्धमानाज्यवर्तिभिः।**
**सितादिभिर्निशिर्ज्ञेया प्रज्वाल्यावृत्य दर्शनात्।।**
**खाते रात्र्युषितैः पुष्पैस्तथा ज्ञेया सितादिभिः।**
**वल्मीकशर्करारन्ध्रः तुषाङ्गारास्थिभस्मभिः।।**[16] इति।

विष्णुतिलके षष्ठेऽध्याये11-22श्लोकैः, विष्वक्सेने प्रथमे1-60श्लोकैः, श्रीप्रश्ने चतुर्थेऽध्याये 43-53श्लोकैः, पञ्चमेऽध्याये 1-17श्लोकैः भूपरीक्षा कथिता। हयशीर्षपाञ्चरात्रे आदिकाण्डे पञ्चमेऽध्याये 9-21श्लोकैः, षष्ठेऽध्याये 1-14श्लोकैः भूमिलक्षणानि प्रतिपादितानि।

---
[15]कपिं. 8.10-14
[16]वि.12.7-10

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2024); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:13, Issue:12(2), December: 2024
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## उपयुक्तग्रन्थसूची (Bibleography)

1.अष्टाध्यायी - आर्.जे.त्रिपाठी-चौखाम्भा संस्कृतप्रचुरणालयः – वरणासी 1995

2.अनिरुध्दसंहिता - ए.श्रीनिवास अय्यङ्गर् – मैसूर् -1956

3.अहिर्बुध्न्यसंहिता - देवशिखामणि रामानुजाचार्यः – अडयार्- चेन्नै - 1916

4.ईश्वरसंहिता - वि.स्वामिनाथनः, पि.बि. अण्णङ्गराचार्यः1968 रत्नमुक्तवलीसिरीस् -काञ्ची1923

5.पुरुषोत्तमसंहिता – पि. सीतरामाचार्याः-पाञ्चरात्रपरीरक्षण सभा – भद्राचलम् -1931.

6.महाभारतम् - वि.एस्. सूक्थङ्कर्, बल्वक्कर् भगवान् व्यासः शान्तिपर्वः Vol.16 Part-B

Bhandarkar Oriental Research institute. पूणे -1954

7.विष्वक्सेनसंहिता - लक्ष्मीनरसिंहभट्टः - राष्ट्रियसंस्कृतविद्यपीठम् - तिरुपति-1972

8.विहगेन्द्रसंहिता - वडोदरा प्राच्यविद्यासंस्था – गुजरात् - 1963